~~[illegible]~~

[illegible] ২২ [illegible]

C1833

श्री॰
शृं॰ ति॰
प्र॰
१

॥ॐ श्रीगणेशाय नमः॥ कालिंदीकूलकेलिः कुतुकितहृदयः पंचशाखांबुजन्मश्यावल्लीदृशाहेमाः॥ प्रचुरफलघटाश्यामधा-
माभिरामः॥ राधामाधायकंठे कठिनतरकुचाभोगसंभोगराजद्वक्षाः क्रीडाकटाक्षैः स्मितहसितमुखः पातु पीतांबरो वः॥१॥ गो-
पालभट्टः कुरुते टीकां रसतरंगिणीं॥ शृंगारतिलकाख्यस्य सद्गुणाह्लादकारिणीं॥२॥ पद्यानां योजना नावह्याख्यानं त्वत्रास्फुटस्य-
तु॥ क्रियते च्छंनया रीत्या बालबुद्धिहिते नवे॥३॥ निर्विघ्नपरिसमाप्तये स्वेष्टदेवतां श्रीशिवं सर्वरसाश्रयतया स्तुवन्नेवाशीरूपं
मंगलं निबध्नाति रुद्रकविः॥ शृंगारी गिरिजानने सकरुणो रत्यां प्रवीरः स्मरे बीभत्सोस्थिभिरुत्फणी च भयकृन्नेत्रत्रयेणा-
द्भुतः रौद्रो दक्षविमर्दने च हसकृन्नग्नः प्रशांतः श्रमादित्थं सर्वरसाश्रयः पशुपतिर्भूयात्सतां भूतये॥१॥ स पशुपतिः सतां भू-
तये भूयात् कथंभूतः पशुपतिः गिरिजानने शृंगारी रत्यां करुणः स्मरे प्रवीरः अस्थिभिर्बीभत्सः उत्फणी सन् भयकृत् ने-
त्रत्रयेणाद्भुतः दक्षविमर्दने रौद्रः नग्नः सन् हसकृत् श्रमाच्छांतः पुनः इत्थं सर्वरसाश्रयः शृंगारी शृंगाररसवान् गिरिजा-
या आनने मुखे यद्वा गिरिजायां अत्र आननपदेन सर्वशरीरस्योपलक्षणात् यद्वाहकामेदकः॥ मुखमेव शरीरस्य सर्वं वा मुख्यते
तत्रापि नासिका श्रेष्ठा नासिकायास्तु लोचनं इति नडपादानफलं तु कामिनां कामिनीमुखारविंदविलोकनं यथा करुणका-
रितनथा गांगरविलोकनमिति करुणः करुणरसवान् उन्नतः फणी यस्मिन्नुन्नत एव भयकृत् भयानकरसवान् एवं सर्वत्र

ॐ॰
१

इत्थंभूतप्रकारेण सर्वेषां रसानां आश्रयः सर्वरसात्मक इति पाठे तु रसः सर्वतोर्भेद्राभावेन शृंगारी गिरिजानन इत्यादि न संगच्छेत् तस्मात्स-
र्वरसाश्रयः पाठः समीचीनः शार्दूलविक्रीडितं छंदः॥ अर्कोश्वैर्यदि मः॥ सजौ सततगाः॥ शार्दूलविक्रीडितं॥१॥ काव्यस प्रयोजनमभि-
निरूपयन् कवीन् प्रोत्साहयितुं काव्यं स्तौति आख्यानेति॥ आख्याननामरचनाचतुरस्रसंधि सद्वागलंकृतिगुणं रससंप्रयुक्तं
आसेदुषामपि दिवं कविपुंगवानां तिष्ठत्यखंडमिह काव्यमयं शरीरं॥२॥ कविपुंगवानां इह काव्यमयं शरीरं अखंडं तिष्ठति
किंभूतं काव्यं आख्याननामरचनाचतुरस्रसंधि पुनः सद्वागलंकृतिगुणं पुनः रससंप्रयुक्तं च किंभूतानां कविपुंगवानां दिवमा-
सेदुषामपीत्यन्वयः॥ इहलोके काव्यस्वरूपं गाढूप्येमयद्शरीरं गात्रं॥ अखंडं संपूर्णं॥ आख्याननामानि इतस्तस्य च नानारचनाप्र-
योगः तया चतुरस्रः समीचीनः संधिः संधिसंघटनं यस्य तत् सन्मः॥ प्रशस्ताः वाचः पदानि अलंकृतयः॥ अलंकाराः स्वभा-
वोक्त्यादयश्च गुणाः श्लेषादयश्चेति सद्वागलंकृतिगुणा विद्यंते यस्मिन् तत् रसाः शृंगारादयस्तत्सहितं संप्रयुक्तं युक्तमित्युपल-
क्षणं॥ शोभनानि छन्नानि गद्यपद्यमिश्रकाख्या छंदोविशेषाः यस्मिन् स्वर्गगतानां अपि शरीरपक्षे किंभूतं शरीरं आख्या-
नं प्रसिद्धं नाम यस्य तत् पुनः॥ किंविशिष्टैः कर्त्रैः रचनया चतुरस्राः सुवर्तुलाः संधयो गात्रविभागा यस्मिन् तत् पुनः सत् शोभ-
ना वाक् वाणी यस्य तत्॥ अलंकृतिः कुंडलादिः गुणाः सौंदर्यादयः तैः यस्मिन् पुनः रसो माधुर्यादिस्तत्सहितं शोभनं छन्नविशालनायर

श्री॰
शृंगा॰
ति॰ क॰
प्र॰
२

स्मिन्वसंततिलकंछंदः ज्ञेयंवसंततिलकंतभजाजगौगः स्वेष्टदेवतास्मरणरूपंमंगलंकाव्यस्वरूपंचनिरूप्येदानींस्वकाव्यस्यनिर्दोषतांदर्शयति ॥ काव्यइति ॥ काव्येशुभेविरचितेखलुनोखलेभ्यः कश्चिद्गुणोभवतियद्यपिसंप्रतीह ॥ कुर्यात्तथापिसुजनार्थमिदंयतः किंयूकाभयेनपरिधानविमोक्षणंस्यात् ॥ ३ ॥ संप्रतिइदानींइहकाव्येविरचितेपिविशेषेणरचितेपिखलेभ्यः ॥ परछिद्रान्वेषिभ्योयदिकश्चिद्गुणः कियत्यपिस्तुतिर्नभवतितथापिइदंकाव्यंसुजनानामनुरक्तानांतदर्थंकुर्यात् किंभूतेशुभेनिर्दोषेसालंकारेयतोयूकाभयेनकिंपरिधानविमोक्षणंस्यात् परिधीयतेनेनेतिपरिधानंवस्त्रंतस्यपरित्यागः ॥ वसंततिलकंछंदः ॥ ३ ॥ ननुसुजनार्थंकाव्यंकर्त्तव्यं ॥ इत्युक्तेसर्वेनत्रसुजनाद्विविधाअनुरक्ताविरक्ताश्चतत्रविरक्तानामनुपयोग ॥ एवंनास्तिअनुरक्तानामुपयोगोपितदर्थंप्राचीनकाव्यान्येववहूनिसंतीतिकिमनेननवीनकाव्यनिर्माणप्रयासेनेत्यत्रात्मप्रशंसारूपंपद्यमाह ॥ सानंदेति ॥ सानंदप्रमदाकटाक्षविशिखैर्येषांनभिन्नंमनोयैः ॥ संसारसमुद्रपातविधुरेष्वन्येषुपोतायितं यैर्निःसीमसरस्वतीविलसितंद्वित्रैःपदैः संदृष्टंतेषामप्युपरिस्फुरंतिमतयः कस्यापिपुण्यात्मनः ॥ ४ ॥ कस्यापिलोकोत्तरस्यकृतपुण्यपुंजस्यमतयः तेषांसर्वेषांविरक्तानामनुरक्तानामपिउपरिस्फुरंतिचमत्काररूपाभवंतियेषांविरक्तानामनत्र्यपिसंसीहृष्टरमणीकटाक्षबाणैः ॥ नभिन्नंखंडितंकटाक्षोपांगदर्शने इत्यमरः ॥ कटाक्षलक्षणंयथा यत्रतारागतविश्रांतिवे

ॐ
२

विशेषेणविवर्द्धने ॥ तारकायाः कलाभिज्ञासंतकथासंप्रचलनेइतिपुनः ॥ येष्वविरक्तेष्वन्येषुसंसारिषुपोतायितंवहित्रवत्आचरितंकिंभूतेष्वन्येषुसंसारः संसरणंसएवसमुद्रस्तस्मिन्पातःपतनंतेनविधुरेषुव्याकुलेषु येष्वअनुरक्तैः ॥ द्वित्रीणिवापरिमाणंयेषांतानिद्वित्राणितैःपदैः निःसीमनिर्मर्यादंसरस्वत्याविलसितंविलासःसंगृहीतः ॥ अयमर्थः ॥ अतिकुशाग्रबुद्धितयानिर्मर्यादसरस्वतीविलासस्यापिसंग्रहोद्वित्रेष्वेवपदेषुदर्शितः इतिअयमभिप्रायः ॥ प्राचीनेषुकाव्येष्वेकैकस्यरसस्यप्रतिपादनमतस्मात्रसविशेषापरिस्फूर्तेस्तदुपादेयत्वमेवएतस्मिन्ममकाव्येननानाविधरसानांसविशेषतयानिरूपणाद्विरक्तानांशांतरसेष्वुपयोगोऽनुरक्तानांतुशृंगारादिरसेषुस्वास्वोपयोगएवेतिस्वस्यकाव्यस्यप्राचीनकाव्यापेक्षयाविशेषः इहविनइतिशार्दूलविक्रीडितंछंदः ॥ ४ ॥ प्रायइति ॥ प्रायोनाद्यप्रतिप्रोक्ताभरताद्यैरसस्थितिः ॥ यथामतिमयाप्येषाकाव्यंप्रतिनिगद्यते ॥ ५ ॥ भरताद्यैःरसानांशृंगारादीनांस्थापनंनाट्येनटनकर्मप्रतिप्रायोवाहुल्येनदृष्टारसस्थितिः प्रोक्ताअनुष्टुप्छंदः ॥ ५ ॥ अथनीरसकाव्यंपरिहरन्नाह यामिनीवेति ॥ यामिनीवेंदुनामुक्तानारीवरमणंविना ॥ लक्ष्मीरिवऋतेत्यागान्नोवाणीभातिनीरसा ॥ ६ ॥ वाणीनीरसारसरहितानप्रकाशतेइंदुनामुक्तात्यक्तारात्रिरिवरमणःकांतः त्यजनमितित्यागोदानंतस्मात्ऋतेविनालक्ष्मीरिवऋतेइत्यत्रऋत्यकइतिप्रकृतिभावादाद्गुणइतिगुणोनभवतियद्वासंहितैकपदेनित्याइतिश्लोकवाक्यान्नसंधिः ॥ इदानीं

श्री·
शृं·ति·
प्र·
३

स्ववाग्गुणोत्कर्षमुपवर्णयन्नाह सत्यमिति ॥ सत्यं संति गृहे गृहे सकवयो येषां वचश्चातुरी स्वे हर्म्ये कुलकन्यकेव लभते जातैर्गुणैर्गौरवं ॥ दुः
प्रापः स तु कोऽपि कोविदपतिर्यद्वाग्रसग्राहिणां पण्यस्त्रीव कलाकलापकुशला चेतांसि हर्त्तुं क्षमा ॥ ७ ॥ सत्यं सुकवयो गृहे गृहे संति येषां
वचश्चातुरी वचनवैचित्र्यं जातैः स्वयं कल्पितैः गुणैः श्लेषादिभिः गौरवमुत्कर्षं स्वगृह एव लभते केवलं कुलकन्येव यथा कु
ला कान्या जातैः सहजैर्गुणैः सौंदर्यादिभिः स तु कोऽपि लोकोत्तरः कोविदपतिः दुर्लभः यस्य वाणी रसविशेषस्वादलुब्धानां मा
नसमाकृष्टुं समर्था का इव वेश्येव पण्यस्त्री गणिका वेश्या सापि नानाविधपुष्पिका इत्यमरः ॥ पीनांशोरीचैतद्वाणीपक्षे कलाम
धुराः पदपदार्थकल्पनास्तासां कलापः समूहस्तत्र निपुणा वेश्यापक्षे कला हावभावकटाक्षनिरीक्षणादिः ॥ तस्यास्समरु
स्तत्र चतुरा यद्वा कलाश्चतुःषष्टिकलास्ता एव कलापो भूषणमलंकार इति यावत् ॥ तेन कुशला विचित्रा कलापो भूषणे
बर्हे तूणीरे संहतेपि चेति विश्वः शार्दूलविक्रीडितं छंदः ॥ ७ ॥ तस्मादिति ॥ तस्मात् यत्नेन कर्तव्यं काव्यं रसनिरंतरं ॥ अन्यथा
शास्त्रविद्गोष्ठ्यां तस्मादुद्वेगदायकं ॥ ८ ॥ तस्मात् यत्नेन काव्यं कर्त्तव्यं ॥ किंभूतं च रससंयुक्तं ॥ अन्यथा अरसं चेत् काव्यं शास्त्र
विदां गोष्ठ्यां सभायां [illegible] रंगात् दुःखजनकं कुर्वतीति शेषः ॥ रसविंदत्वं काव्यं कर्त्तव्यं इत्युक्तं तत्र कति रसास्तानेवा
ह ॥ शृंगारेति ॥ शृंगारहास्यकरुणरौद्रवीरभयानकाः ॥ बीभत्साद्भुतशांताश्च नव नाट्ये रसाः स्मृताः ॥ ९ ॥ नाट्येनदकर्मा

ॐ·
३

प्रतिपादके शास्त्रे नवैव रसा उक्ताः ॥ शृंगारादीनां रसानां क्रमेण स्थायिभावानाह ॥ रतिरिति ॥ रतिर्हासश्च शोकश्च क्रोधोत्सा
हौ भयं तथा ॥ जुगुप्सा विस्मयशमाः स्थायिभावा इमे स्मृताः ॥ १० ॥ इमे रत्यादयः स्थायिभावाः स्मृताः रत्यादीनां लक्षणानि
स्वयमेव स्पष्टयिष्यति तृतीयपरिच्छेदे तथाहि शृंगारस्य रतिः प्रीतिः स्नेह इति यावत् स्थायिभावः हास्यरसस्य हासः करुण
रसस्य शोकः रौद्ररसस्य क्रोधः वीररसस्य उत्साहः भयानकरसस्य भयं ॥ बीभत्सरसस्य जुगुप्सा ॥ अद्भुतरसस्य विस्मयः शां
तरसस्य शमः ॥ मनसः ॥ स्वात्मन्येवावस्थापनं शमः ॥ तिष्ठत्यस्मिन् भावे य एक एव रस इति स्थायी ॥ उक्तं हि रसास्तासिधौ
अविरुद्धान् ॥ विरुद्धांश्च भावान् यो वशतां नयेत् ॥ स राजेव विराजेत स्थायी भावः स उच्यते ॥ स्थायिभावानुक्त्वा इदानीं व्या
भिचारिभावानाह निर्वेद इति ॥ निर्वेदोऽथ तथा ग्लानिः शंकासूयामदश्रमाः ॥ आलस्यं चैव दैन्यं च चिंता मोहः स्मृतिर्धृतिः ॥ व्री
डा चपलता हर्ष आवेगो जडता तथा ॥ गर्वो विषाद औत्सुक्यं निद्रापस्मार एव च ॥ स्वप्नं प्रबोधोऽमर्षश्चाप्यवहित्थमथोग्रता
मतिर्व्याधिस्तथोन्मादस्तथा मरणमेव च ॥ त्रासश्चैव वितर्कश्च विज्ञेया व्यभिचारिणः ॥ त्रयस्त्रिंशदिमे भावाः प्रयांति रससं
स्थितिं ॥ ११ ॥ मुत्रयस्त्रिंशद्भावाः व्यभिचारिणो विज्ञेयाः ॥ किंभूता इमे रससंस्थितिं प्रयांति इमे निर्वेदादयः रसान् अनुभावयंती
ति भावाः विशेषेणाभितः सर्वतः शृंगारादीन् रसान् चरंति गच्छंतीति व्यभिचारिणः रसानां शृंगारादीनां सम्यक् स्थि

श्री०
शृं० क०
प्र०
५

ति प्राप्नुवंति ॥ अयमभिप्रायः एते भावास्तत्र तत्र जायमानास्तं तं रसं पुष्णंतस्तस्य तस्य रसस्यांगतां प्रपद्यंत इति ॥ ९ ॥ ऊनोपि हेतोः स्वा
वमानं तं निर्वेदो वैराग्यं ॥ १ श्रमाध्याधिरतादिभिर्विषयभोगातिचुप्लानिः वीर्यापराधपरक्रोर्यंचासोस्त्लानि ॥ २ ॥ स्वानादिभिरन
र्थप्रतिभानशंका ॥ ३ ॥ क्रोधदौर्ध्यगर्वादिभिः परगुणेषु दोषबुद्धिरसूया ४ कादंबरीमधुपानादिजन्यो मदः ॥ ५ ॥ खेदः श्रमः
प्रयत्नाप्यकर्यो आलस्यं ॥ ७ ॥ स्वास्मिन्नपकर्षनाबुद्धिर्दैन्यं ॥ ८ ॥ सदर्शनसंतोषयोः प्रकारजिज्ञासाचिंतनं चिंता ॥ यद्वाऽभीष्टा
ऽप्राप्तिजनितं ध्यानं चिंता ॥ ९ ॥ हर्षविश्लेषदादिभिश्चित्तवैक्लव्यं मोहः ॥ १० सदृशदर्शनदृढाभ्यासप्रश्नितवेष्टाद्युद्बोधितसं
स्कारजन्मज्ञानं स्मृतिः उपस्थितेपि भयेऽव्याकुलता धृतिः ॥ ११ ॥ लाभादिभावाजाप्रीतिर्धृतिर्वा ॥ १२ ॥ नवीनासंगमाकार्यस्तव
मादशादिहेतुकोऽधोमुखत्वादिकारको धार्ष्ट्याभावो व्रीडा लज्जा ॥ १३ ॥ रागद्वेषाश्चर्यामर्षादिजनितं चंचलत्वं चपलता ॥ १४
ऽभीष्टागमाभीष्टलाभादिजनितमनःप्रसादो हर्षः १५ ॥ प्रियाप्रियदर्शनश्रवणजनितसंभ्रम आवेगः कामक्लेशजनितस
कलविषयहेयताज्ञानं वा ॥ १६ ॥ इष्टानिष्टश्रवणदर्शनविरहादिभिः सर्वकार्याप्रतिपत्तिर्जडता ॥ विरहव्यथाविकारमात्र
जीवनोऽवस्थानं वा ॥ १७ ॥ सौभाग्यरूपगुणोत्तमाश्रयणोत्कलाभकुलयौवनलावण्यैश्वर्यादिजनितदर्पैरस्मिन्नवज्ञाना
दः ॥ १८ ॥ इष्टानवाप्तिप्रारब्धकार्यासिद्धपरादिभिरभिमानभंगो विषादः ॥ १९ ॥ कालाक्षमत्वमौत्सुक्यं २० ॥ उन्नवंचनाचिंताल

शृं०
५

मश्रमादिना मनःक्लांतमत्वमौत्सुक्यं मनसो बाह्येंद्रियैरसंयोगो निद्रा २१ ॥ रुजावेशविरहादिकृतावेतनोऽपस्मारः २२ ॥ स्मरणीयस्यार्थ
स्याविस्मृतिरपस्मारो वा ॥ सर्वेंद्रियसंमोहजनितनिद्राप्तिकरणककिंचित्पदार्थावलोकनज्ञानं सुप्तं २३ ॥ निद्रानाशः प्रबोधः २४
अधिक्षेपापमानजनिताभिनिवेशोऽमर्षः ॥ २५ ॥ जैह्म्यदाक्षिण्यव्रीडाभयगौरवादिभिराकारगुप्तिरवहित्थं २६ क्रौर्यानिर्दय
चित्तत्वमुग्रता २७ यथार्थबुद्धिर्मतिः २८ मदनवेदनाद्यनेकभवजनितसंतापकार्श्यादिदोषो व्याधिः २९ ॥ औत्सुक्यसंतापादि
कादितनमनोविपर्ययथासमस्तप्रियाश्चित्तव्यावापार उन्मादः प्रौढानंदविरहजनितचित्तविभ्रमो वा ॥ ३० मनसइंद्रियैः सहवि
च्छेदो मरणं ॥ ३१ ॥ गर्जितादिजनितचित्तविक्षेपस्त्रासः ॥ ३२ ॥ संदिग्धार्थविचारो वितर्कः ॥ ३३ व्यभिचारिभावानुक्त्वा सात्त्विकभाव
नाह स्तंभ इति ॥ स्तंभः स्वेदो रोमांचः स्वरभंगोथ वेपथुः ॥ वैवर्ण्यमश्रुप्रलय इत्यष्टौ सात्त्विकाः स्मृताः ॥ १५ ॥ हर्षभयाश्चर्यवि
षादामर्षादिसंभवः स्तंभः निश्चेष्टता १ तत्रवाक्यादिराहित्यं नैश्चल्यं स्वस्तता दयोनुभावाः ॥ हर्षभयोक्रोधादिजस्तनुक्लेदकृत
स्वेदः प्रस्वेदः २ आश्चर्यहर्षोत्साहभयादिजो रोमांचः रोमोद्गमः ३ ॥ विषादविस्मयामर्षहर्षभीत्यादिसंभवो गद्गदादिकृत्स्व
रभंगः वैस्वर्यं ४ विश्वासामर्षादिजो गात्रलोल्यकृत्वेपथुः कंपः ५ विषादिरोषभीत्यादिजं मालिन्यकार्श्यादिकृत् वैव
र्ण्यं वर्णविक्रिया पांडरत्वादि ६ हर्षरोषविषादादिजं नेत्रजं जलमश्रु ७ हर्षजेक्ष्णोशीतत्वं मोसंरोषादिसंभवं इति बोध

श्री॰
शृं॰ कं॰
५

संस्त्रवडुभवाभ्यां चेष्टाज्ञाननिराकृतिः प्रलयः ८॥ तत्र महीनिपतनादयोऽनुभावाः इति अमुनाप्रकारेण स्तंभादयोऽष्टौ सात्त्विकाः सत्वे-
भवाः सात्त्विकाः सत्वं मनः करणं यस्य सत्त्वोद्रेकस्तस्मिन्नेवैते भवंति कोमलस्यांतःकरणस्यैवेत्यर्थः अतिकठिनस्य महाम्रद-
स्यवैते न गुणा इति हेतोः सात्त्विका उच्यंत इति भावः एवं पंचाशदपि भावानुक्तास्यापि भावानामेव शृंगारादिरसतामाहस्था-
वायत्वेति ॥ भावा एवातिसंपन्नाः प्रयांति रसतामभी ॥ यथा द्रव्याणि भिन्नानि मधुरादिरसात्मतां ॥ ६ ॥ अमी भावा एव अतिसंप-
न्नाः संतः रसतां प्रयांति यथा भिन्नानि द्रव्याणि मधुरादिरसात्मतां प्रयांतीत्यन्वयः भावा रत्यादयः अतिसंपन्नाः अतिशयं प्रा-
प्ताः संतः रसतां शृंगारादिरसादिशब्दवाच्यतां भिन्नानि द्रव्याणि दधिशर्कराकर्पूरप्रभृतीनि केश्चिद्विशेषैरेतिसंयं प्राप्तानि मधुरा-
दिरसात्मतां प्राप्नुवंति तद्वत् ॥ रसो नाम कश्चिदनिर्वचनीयसुखास्वादः एवं सति अमी भावा अनुभावव्यभिचारिभिरतिशयं प्रापि-
ताः संतो रसस्वरूपतयोच्यंते ॥ इत्यर्थः तत्र दृष्टांतमाह ॥ संभवंति यथा वृक्षे पत्रपुष्पफलादयः तादृग्रसेऽपि रुचिरा विशेषा भावरूपिणः ॥ १२ ॥
यथा वृक्षे पत्रपुष्पफलादयो विशेषाः ॥ संभवंति तादृग्रसेऽपि भावरूपिणो रुचिरा विशेषाः संभवंतीत्यन्वयः ॥ आदिशब्देनांकु-
रपुष्पामोदफलस्वादुविशेषाः संभवंति संगता भवंति रसेऽपि शृंगारादावपि भावरूपिणो विशेषाः ॥ सात्त्विका भावाः रुचिराः स्पृ-
हणीयाः यथा एकस्मिन्नपि वृक्षे परस्परविलक्षणाः पत्रादयः कमनीयाः विशेषाः संभवंति तथैकस्मिन्नपि रसे नानाशृंगाराद-

॥ १२ ॥
उं॰
५

यो विशेषाः संभवंतीति भावः ॥ १३ ॥ प्राय इति ॥ प्रायो नैकरसं काव्यं किंचिदत्रोपलभ्यते बाहुल्येन भवेद्यस्तु स तद्वत्तया निगद्यते ॥ १४ ॥
अत्र एकरसं काव्यं प्रायः किंचिद् उपलभ्यते नु पुनः ॥ प्रायो बाहुल्येन भवेत् स तद्वत्तया निगद्यते अत्रास्मिन्लोके एक एव रसो
यस्मिन् तत् प्राय इत्यव्ययं बाहुल्यार्थे न उपलभ्यते न दृश्यते पर्यापि कथमपि केनापि निपुणेन काव्यमेकरसं निबद्धं तथा-
पि तत्रापि रसांतरसंकरस्य [illegible] नहि शृंगारकाव्यं वीरकाव्यमिति प्रसिद्धिः कथमित्यत आह बाहुल्येनेति यो र-
सो यस्मिन् काव्ये बाहुल्येन भवेत् ॥ स रसः तद्वत्ता काव्यं तद्वत्तया निगद्यते तद्रसप्रधानतया तत्काव्यं व्यपदिश्यत इत्यर्थः तत्र द्वा-
वृत्तीर्दर्शयति कैशिकीति ॥ कैशिक्यारभटी चैव सात्त्वती भारती तथा ॥ चतस्रो वृत्तयो ज्ञेया रसावस्थानसूचिकाः ॥ १५ ॥ वृत्तयः च-
तस्रो ज्ञेयाः कैशिकी आरभटी सात्त्वती भारती किंभूता वृत्तयः रसावस्थानसूचिकाः रसानां शृंगारादीनां अवस्थानं स्वरूपं
निप्रापयंति ताः कोमलकर्कशपदरचनया हि निपुणकविविषयो व्यापारो निगद्यते कैशिक्यादिवृत्तीनां च स्वरूपाणि लक्षणानि स-
यमेव स्पष्टयिष्यति तृतीयपरिच्छेदे धर्मादिति ॥ धर्मादर्थोऽर्थतः कामः कामात्सुखफलोदयः ॥ साधीयानेष तत्सिद्धौ शृं-
गारो नायको रसः ॥ एष शृंगारो रसः ॥ तत्सिद्धौ सुखफलोदयसिद्धौ साधीयान् अतिश्रेष्ठः ॥ अर्थोऽपि शृंगारासमादायेवा-
कामं जनयति ॥ अतो हेतोः ॥ अयं रसो नायकः श्रेष्ठः ॥ चेष्टा भवति पुंनार्योरत्तुस्या यानुरक्तयोः ॥ संयोगो विप्रलंभश्च शृंगा-

रोद्विविधो मतः ॥५॥ अनुरक्तयोः पुन्नार्योः रत्युद्भवा या चेष्टा स शृंगारः स द्विविधः संयोगो विप्रलंभश्च अनुरक्तयोः प्रीतिमत्र्योर्मनोः र
तिजनिता प्रथमतः किंचिदुत्कविलोकनादिरूपा शृंगारः यद्यपि पुमाद्यालंबनौ वसंताद्युद्दीपना गाढलिंगनादि प्रकाशि
ताः हर्षादिसंचारिभिरुपचिंता रतिरेव शृंगारः ॥ तथापि रत्युत्थचेष्टयोः कार्यकारणयोरभेदविवक्षया रत्युत्थचेष्टा शृंगार
इत्युक्तं दर्शयति ॥ संयुक्तयोस्तु संयोगो विप्रलंभो वियुक्तयोः ॥ प्रच्छन्नश्च प्रकाशश्च पुनरेव द्विधा यथा ॥६॥ संयुक्तयोः ॥ संयोगः
विप्रयुक्तयोः विप्रलंभः ॥ एष संयोगो विप्रलंभरूपः ॥ पुनरेव द्विधा प्रकाश संयोगः प्रच्छन्नसंयोगः ॥ प्रकाशविप्रलंभः ॥ प्रच्छन्नवि
प्रलंभश्चेति संयुक्तयोः संयोगिनोः पुन्नार्योः संयोगरूपः वियोगिनोर्विप्रलंभः शृंगारः यथेति दर्शयति तत्र प्रकाशसंयोग
मुदाहरति ॥ मदनेति ॥ मदनकुंजरकुंभतटोपमे स्तनयुगोपरितः स्फुरितांगुलिं ॥ मकरजक्षतवाममपि प्रियाद्दपितपाणिम
मत्यनंदसिणीं ॥२॥ प्रियाद्दपितपाणिः सकरजक्षतवाममपि करजानखास्तेषां क्षतं विद्धं तेन सह वर्त्तते इति सकरजक्षतः सवा
सौ वामश्चेति सकरजक्षतवामः प्रतिकूलः ॥ नादृशमपि दक्षिणमनुकूलं ज्ञानवती वाममपि दक्षिणमिति विरोधाभासा
लंकारः किंभूतं पाणिं परितः ॥ सर्वतः स्फुरिताश्चंचला अंगुलयो यस्मिन् मदनकुंजरः ॥ कामहस्ती तस्य कुंभतटवत् उपा
मा यस्य स तस्मिन् मदनकुंजरेभ्यते नातिकमनीयतरे कुंभतटोपमत्वे नातिपीनतरे स्तवितं ॥ कुतविलोकितं छेदः ॥ कुतविले

वितमाहुर्भौमेवे ॥ अथ प्रकाशविप्रलंभमुदाहरति सेतमः ॥ स्मरसंनिवेशविवशैः ॥ श्वासैर्मुहुः पंचमोद्गारवद्भिरापतद्भिरभि
तः ॥ सिक्तश्च नेत्रांबुभिः ॥ यत्तस्याः प्रियविप्रयोगविधुरस्तल्पाधरो यामिनीं तां स प्रत्युद्गतवह्निवारिविषमं मन्ये व्रतं सेवते ॥२४॥
यत्तस्याः ॥ नायिकायाः अधरः इदानीं व्रतं सेवते इत्यहं जानामि किं कृत्वा यामिनीं तां यत्वा किंभूतं व्रतं उद्भूते उद्गते येय वह्निवा
रिणी ताभ्यां विषमं किंभूतोधरः प्रियस्य विप्रयोगो वियोगस्तेन दुःखितः पुनः किं श्वासैः संप्लुतः पुनः आपतद्भिर्ने
त्रांबुभिः सर्वतः सिक्तः किंभूतैः श्वासैः ॥ स्मरस्य संनिवेशात् हृदये प्रवेशस्तेन विवशैः पुनः किंभूतैः निरंतरं पंचमस्य वायु
विशेषस्य य उद्गारो निर्गमस्तेन आवर्त्तनं मंडलवत् परिभ्रमितं तैः योगग्रंथे पंचमः कश्चिद्वायुविशेषः यद्वा पंचमस्य
रागभेदस्य उद्गारो निर्गमस्तद्वत् आवर्त्तनं आवर्त्तनं आरोहावरोहणं पंचमो रागभेदः स्यान्नेत्राणामपि कर्णी पंचमश्चा
गुरेहृद्ये पंचमः ॥ षाडवो हि प्रियामिति विश्वः शार्दूलविक्रीडितं ॥ प्रच्छन्नसंभोगमुदाहरति ॥ कांत इति ॥ कांते विविक्ते सत
क्रमकंदुकागे संकेतकेहरिणशावदृशा वसेन ॥ तत्कूजितं किमपि येन तदीयतल्पं नाल्पैः परितमनुकूजितलावकौघैः ॥२५॥
हरिणशावदृशा संकेतके अभिसारगृहे रसेन स्वरतानंदेन किमपि अद्भुतं कूजितमुक्तं येन कूजितेन तस्या अभिसार
रिकायाः ॥ तल्पं शयनं अनुनादितं लावकसमूहैः ॥ परीतं वेष्टितं अल्पैर्न परीतमित्यन्वयः क्व सति कांते प्रिये विविक्ते

श्री॰
शृं॰ति॰
क॰
७

चुंबनकुचमर्दननखघातादिरूपं यत्सुखं तेन तस्य क्रमः उपक्रमः प्रारंभ इति यावत् तस्मिन् दक्षो रामो येन स तथा वसंततिलकं छं
दः॥ तत्र प्रछन्नविप्रलंभमुदाहरति॥ किंचिदिति॥ किंचिदुञ्चितकंठकंदलपीनस्तनावर्त्तनव्यायामाञ्चितकंचुकं स्मरगृहद्वार
स्तस्यास्तदालोकितं वाचस्ताश्च विदग्धभावगुरवः स्फारीभवन्मन्मथा हे हे मानस किं स्मरस्यभिमताः सिद्ध्यंति पुण्यैः क्रियाः ॥२६॥
हे हे इत्यव्ययं सादराभिमंत्रणे हे मानस तस्यास्तदा हृष्ट तदालोकितं तास्ताश्च वाचः किं स्मरसि अभिमताः॥ क्रियाः पुण्यैः सि
द्ध्यंति किंभूतमालोकितं किंचिदुञ्चितयत्कंठकंदलं कंठनालं तेन दलत् त्रुट्यत् पीनस्तनयोः॥ आवर्त्तनं मंडलं तस्य व्या
यामो विशेषेण आयामो दैर्घ्यं तं गतेन तेनाञ्चितं उद्धृवितं उन्नमितं यत् कंचुकं तत् किंचिदुञ्चितकंठकंदलेन दलत् यस्मिन् तत्
आलोकितं स्मरसणं संगीतरत्नाकरे सहसादर्शनं लक्षितं तदालोकितं मुदीरितं किंभूताः वाचः विदग्धभावश्चिता कर्षणं तत्र च
गुरुः पुनः स्फारीभवन्वर्द्धमानो मन्मथः कामो याभ्यस्ताः शार्दूलविक्रीडितं संभोगविप्रलंभशृंगारं निरूप्येदानीं नायकल
क्षणमाह॥ त्यागीति॥ त्यागी कुलीनः कुशलो रतेषु कल्यः॥ कलावित्तरुणो धनाढ्यः॥ दक्षः क्षमी स्थिररुचिः सुभगोभिमा
नी स्त्रीणां मतः सुभगवागिह नायकः स्यात् २७ इह शृंगारे स्त्रीणां मनो नायकः स्यात्॥ किंभूतः त्यागी अलंकारादिदाता
कुलीनः उत्तमकुलोत्पन्नः रतेषु आलिंगनादिषु चतुरः कल्यो रोगरहितः कलावित् कामशास्त्रादिपंडितः दक्षोवरंज

कं॰
७

नप्रवीणः क्षमी सहनशीलः स्थिरप्रीतिः सुभगः सुंदरः अभिमानी दीनतारहितः मधुरभाषीव इंद्रवज्राछंदः स्यादिंद्रवज्राय
दितौ जगौ गः॥ नायकभेदानाहतस्येति॥ तस्यानुकूलदक्षिणशठधृष्टाख्यमत्वेवसारः भेदाः क्रियया च ते तेऽदाहृतयश्च
रमणीयाः॥ २८॥ अत्र इत्येतस्य क्रियया अनुकूलदक्षिणशठधृष्टाः चत्वारो भेदाः पुनः रमणीयाः तेऽदाहृतयश्च उच्यंते
अत्रास्मिन् ग्रंथे इत्येव सम्यक्प्रकारेण तस्य नायकस्य क्रियाभिः रमणीयाः कमनीयाः तेऽदाहृतयः तेषामनुकूल
दक्षिणशठधृष्टानां उदाहृतय उदाहरणानि प्रकाश्यंते तेषामनुकूललक्षणमाह॥ अतिरिक्ततया नार्याः सदा त्यक्तपरां
गनः॥ सीतायां रामवत्सोयमनुकूलः स्मृतो यथा॥ २९॥ अयमनुकूलः स्मृतः॥ स कः॥ यः नार्या अतिरक्ततया सदा
त्यक्तपरांगनः कस्यां कइव सीतायां रामवत् सर्वकालिकपरांगनासुखत्वे सति सर्वकालमनुरक्तो ऽनुकूल इत्यर्थः नार्यां
स्वपुरंध्र्यां अतिशयप्रेम्णा सर्वदा त्यक्ताः परांगना येन सः॥ एषोनुकूलस्वरूपं दर्शयति॥ अस्माकमिति॥ अस्माकं स
खि वाससी न रुचिरे ग्रैवेयकं नोज्वलं नो वक्रा गतिरुज्वलं न हसितं नैवास्ति कश्चिन्मदः॥ किं त्वन्येपि जना वदंति सुभ
गोप्यस्याः प्रियो नान्यतो दृष्टिं निक्षिपतीति विश्वमियता मन्यामहे दुस्थितं॥ ३०॥ हे सखि यद्यपि अस्माकं रुचिरे कम
नीये वस्त्रे न उज्वलं वा कंविकायुक्तं ग्रीवाभरणं न वक्रा गतिर्गमनं न उज्वलं सुंदरं हसितं हास्यभेदो न मधुरं दरसंलक्ष्य

श्री
अ॰टी॰गा॰
९

स्तुपिष्टिः प्रियासाकिं कृत्वायं तुगप्लने अप्रक्तिकिन प्रणयिनि प्रियेयं कोक्रीडितं कृतं आगोपराधो येन तस्मिन्निति कुपाय्य
र्थेः हरिणीछंदः अपिच कोपात्किं विडपानतोपि वसनादाक्षय्य केशेषु धुलं नी॥ तामोहनमंदिरं दयितया हारेणव
धृां दृढं॥ स्योयावासमितिकृत्वाविनिगृह्य कंठार्द्धरुद्धाक्षरं जल्पंत्याः॥ श्रवणोत्पलेनसकृतिको कश्चिद्दहस्ताड्यते॥ ३४
दयितया प्रियया कश्चित्सकृत्ती धन्यः उपसमीपे आसमंतागननतोपि नम्रोपि किंचित्कोपात् अप्रसाकृत्योगृकिं
चनोपमरः॥ वहिः कोपाडंवरत्वादेतर भावान्॥ किंचित्कोपान् रक्तरकांते केशेषाक्षय्य वसनात् अलंयथास्या
च्छाश्रवणोत्पलेनताड्यते॥ किंकृत्वामोहनः कामसक्तगृहं नीत्वा पुनः किंकृत्वाहारेण दृढंवध्वा किंविशिष्टयाहृयि
तयाकंठार्धरुद्धाक्षरं यथाभवति तथा इति मुहुर्वारंवारं जल्पंत्यां इति किंतद्दुहान् भूयो यस्य सिरंभ्रमात्कोपात्
अलंअत्यर्थं यद्वापर्यायेपूर्यतां निवार्यतामितिवानस्याः सखीः प्रतिशठोक्तिः अलं भूषणपर्याप्तिशक्तिवार
णवाचकमिति विविक्तः विजनं स्त्रीणां निः शलाकास्तथा रहः॥ रहश्चोपांशुचालिंगे रहस्यं तद्भवे त्रिषु इत्यमरः।
अथ धृष्टनायकं दर्शयति निःशंक इति॥ निःशंकः कृतदोषोपि विलक्षतां र्जितोपि सन्॥ मिथ्यावाग्दृष्टदोषोपि धृ

गे

ष्टोकथितोयथा॥ ३८॥ असौ धृष्टः कथितः यः कृतदोषोपि निःशंकस्तर्जितोपि सन् विलक्षः पुनः दृष्टदोषोपि सन्॥ मिथ्या
वाक्कृतादोषायेनसतादृशोपि शंकाशून्यः भर्त्सितोपि विलक्षणीयः दृष्टदोषोयस्सतादृगपि मिथ्याभाषीध्येयेतुदाह
रति जल्पंत्या इति॥ जल्पंत्याः परुषं रुषाममवलाश्रुवतसादानतेष्टवान्याशुपदं करेण वकुशः॥ संताड्यमानोपि सन्॥ आली
नां पुरतो दधाति शिरसा पादप्रहारान् अतो तो जाने सखि संप्रति प्रणयिने कुप्यामि तस्मै कथं॥ ३७॥ हे सखि तस्मै प्रणयिने
कथं कुप्यामि संप्रतं तोजाने असौवलान्ममाननं चुंबति॥ किंभूतायाममरुषा परुषं जल्पंत्याः॥ पुनः॥ वकुशः॥ संताड्य
मानोपि सन् करेण करं आश्रुमहत्त्वातिः पुनः नतः सन् आलीनां पुरतः॥ शिरसा पादप्रहारान् दधाति प्रणयिने प्रियकृष्णा
याकुप्यामीत्यवक्रुद्धतुहेश्योस्त्यार्थी नाय प्रतिकोप इति स्त्रैणाचतुर्थी॥ असौ प्रणयी आश्रु[illegible]तेकोपं धि
नावितिगृह्णाति पुनस्तमेवोदाहरति॥ धिक्कां धूर्तं गतत्र प्रणयिनी सेवतया राध्यतां यस्याः॥ पादतला हरतीतं तवहृदिं
व्याख्यातसौयावकः॥ स्पृष्टोपि न नामकंचतियदाऽपादावयं दुर्जनो मिथ्यावादविचक्षणाः किमपदं कुर्यां वयस्येतदा
हे वयस्ये सखि नामकोधं कुत्सनेवानाम प्रकाश्य संभाषक्रोधोपगमकुत्सनइत्यमरः स्पृष्टोपियदा पादौ नमेचति
तदा अपरं किंकुर्यां किंभूतोयं मिथ्यावादविचक्षणः॥ इतीति किं हे धूर्ततत्वांधिक् हे निर्लज्ज सुमेव प्रणयिनीतयारा
ले

॥ २७ ॥

धृतोऽन्यसौ यावकः॥ न च हृदयस्याः प्रणयिन्याः पादतलस्य प्रहारं कथयति कोपादित्यादि पद्यत्रयं शार्दूलविक्रीडितेन ना
यकः॥ सोऽनुकूलाद्यैः स्यात्षोडशविधि भेदतः॥ नोक्ता धूर्तादिभेदस्तु मुनेः संमतप्रभावतः इति चतुर्विधं नायकं निरूप्येदानीं
तस्य सहायान्नर्मसचिवः॥ पीठमर्दो विटविदूषकः इति भेदानाह॥ स्फुटमंत्रेत्याद्येकश्लोकेन तत्र नर्मसचिवलक्षणमाह स्फुट
मंत्रः शुचिर्वाग्मी भक्तो नर्मविचक्षणः॥ स्यान्नर्मसचिवस्तस्य कुपितस्त्रीप्रसादकः॥ ३४॥ तस्य नायकस्य नर्मसचिवः
परिहाससखा स्यात्॥ किंभूतः॥ गुप्तमंत्रः॥ अथ तद्भेदानाह॥ पीठमर्द इति॥ पीठमर्दो विटश्चैव विदूषक इति त्रिधा॥ सभ
वेत्प्रथमस्तत्र नायिकानायकानुगः॥ ३५॥ स पीठमर्दो विटश्चैव विदूषक इति त्रिधा तत्र प्रथमः॥ नायिकानायकानुगो
भवेदित्यन्वयः स नर्मसचिव इति उक्तप्रकारेण त्रिप्रकारः तत्रोक्तेषु पीठमर्दविटविदूषकेषु प्रथमः पीठमर्दनः नायि
कानायकावनुगच्छतीति तदनुरक्त इत्यर्थः गुणैर्नायककल्पोऽयं॥ प्रेमा नवानुवृत्तिमान्॥ पीठमर्दः स कथित इति रसा
मृतसिंधौ विटविदूषकौ दर्शयति एकविद्य इति॥ एकविद्यो विटः प्रोक्तः क्रीडाप्रायो विदूषकः॥ स्ववपुर्वेषभाषाभिर्हा
स्यकारी विटः स्मृतः॥ ३७॥ नर्मविच्च विदूषकः प्रोक्त इत्यन्वयः क्रीडाः केशोपचारधूर्त्तगोष्ठीप्रागल्भ्यादिरूपास्ता
प्रायस्तद्बहुलः॥ एका विद्या कामतंत्रकला यस्य स इत्युक्तं रसामृतसिंधौ केशोपचारकुशलो धूर्त्तो गोष्ठीविशारदः

ॐ॰

काममंत्रकलावेदी विट इत्यभिधीयत इति स्ववपुर्देहस्तस्य वेषो रचना भाषाः॥ प्राकृतं संस्कृतापभ्रंशरूपास्ताभिर्हास्यकार
को विदूषकः॥ तदुक्तं नाट्यलोचने विदूषकस्तु विनतः कुटिले वामके करे॥ तथा दक्षिणहस्तं च वक्रेणाचक्रके पुनः पा
र्श्वमेकं शिरस्येव हस्तेनाचचरणं तथा॥ अनंत्येंगं ससंभ्रमयेल्लयतालरसानुगाः॥ दंतुरः॥ स्खलितः कुब्जः खंजश्च विकृ
ताननः॥ काव्यहास्यं प्रकुर्वीत असंबद्धप्रभाषणात् नानाविधैर्विकारैस्तु तथा वाचाश्लीलभाषितैरिति कुटिलप्रि
तिदंडकाष्ठं वक्रो नाम महत्तकः तल्लक्षणं यथा यस्यां गुष्ठेमध्यमायाम ध्यपर्वोदरं श्रितः उङ्गलीकनीयसी यत्र चतुर
नेकरे विडंबिनि नर्मवित् परिहासवचनवित्॥ चकारः समुच्चये कलहप्रियोपि उक्तं रसामृतसिंधौ वसंतादयभि
धो लोलो भोजने कलहप्रियः॥ विकृतांगवचोवेषैर्हास्यकारी विदूषक इति॥ वसंतम[illegible]लादि[illegible]धानाम
यस्यतः एषां प्रयोगः॥ कुत्र संभवतीत्यपेक्षायामाह॥ एषामिति॥ एषां प्रबंधविषयो व्यवहारः प्रायशो भवेत्प्रचुरः प्रा
तोकमुदाहृतयस्तथापि काश्चित्प्रदर्श्यंते॥ ४०॥ एषां प्रायशः॥ प्रबंधविषयो व्यवहारः प्रचुरो भवेत् तथापि प्रबं
धेऽकेऽस्मिन्नुदाहृतयः प्रदर्श्यंत इत्यन्वयः॥ एषां पीठमर्दविटविदूषकानां प्रायशो बाहुल्येन प्रबंधाः प्रकरणना
टकभाणिकादयस्तद्विषयः॥ तत्र प्रकरणं मालतीमाधवादि॥ नाटकं शाकुंतलोत्तरचरित्रादि भाणिका॥ र

श्री॰
शृंगा॰
तिक॰
ल॰
११

रत्नावल्यादिः ॥ प्रबंधकल्पनाकथाश्चेष भरः एकैकं प्रति उदाहरणानि ॥ तत्र पीठमर्दोदाहरणं ॥ विमुंचामुं मानं सफलय वचः
साधु सुहृदां कथा संतापेनग्लपयसि किं मगास्मरभुवा ॥ प्रिये पादप्रान्ते प्रणतमधुना मानय भृशं न मुग्धे प्रत्येतुं प्रभवति गतः
कालहरिणः ॥ पश्य ॥ हे मुग्धे अमुं मानं विमुंच सुहृदां साधु वचः सफलय स्मरभुवा संतापेन मुधा अंगं किं ग्लपयसि अधुना
भृशं पादप्रान्ते प्रियं मानय यतः कालहरिणः पुनः प्रत्येतुं न भवति मुग्धे सुंदरि स्मरदेवामानः प्रियापराधस्य विकाचेष्टारू
पोहठविशेषः ॥ सुहृदां मित्राणां साधु समीचीनं सफलं कुरु स्मरयत्कामा आह्वयति तेन मुधा व्यर्थं अंगं करचरणादि अंगं प्रति
कोप ॥ यद्वा पश्यन् स्मरः पादप्रान्ते प्रणतेन भ्रंशमानाय कालरूपी हरिणः ॥ कालहरिणः ॥ प[illegible]तुं न समर्थः [illegible]
केन कालस्योन्नालत्वात् उक्तिरेतेति भावः शिखरिणीछंदः ॥ अथ विटोदाहरणमाह प्रणयिनि भृशं तस्मिन्मानं मनस्विनि र
मा कृथाः ॥ किमपरमितो युक्तायुक्तैर्विचार्यमनेनवा ॥ अयमपि भवेत्संप्रत्येव भयानलसंनिभः ॥ सरसकदलीकंदच्छेदच्छ
छविर्मृगलांछनः ॥ पश्य ॥ हे मनस्विनि साहंकारे तस्मिन्नायके मानं मा कृथाः किंभूते तस्मिन् भृशं मत्पर्थं प्रीतिमिति इ
तोस्मादपरं अन्यत् युक्तायुक्तैः किं युक्तायुक्तविचारैः किं न किंचिदित्यर्थः ॥ अधुना नायकेन विना नवसंप्रति मृगलांछ
पीचंद्रोपि भयानलसन्निभः कालाग्निसदृशो भवेत् ॥ किंभूतो मृगलांछनः सरसकदलीकंदच्छेदवत् कांतिर्यस्य स

ङं॰
११

मृगलांछनोपि पीयपनेन चंदनकर्पूरमलयसमीरादीनामतिदुःसहत्वसूचितं ॥ अथ विदूषकोदाहरणं हारादिति हाराकेदलि
तो ॥ हृदि प्रविततैः कंठे लुठद्भिर्हठाद्धक्कीसंकटनासिकान्तरलितैर्निर्यद्भिरन्यूष्मभिः ॥ निःश्वासैः पृथुमन्मथोत्थदवथुर
र्यत्नेनावेदितो मिथ्यालपितसौख्ये कृतागमतः कोपन कांतं प्रति ॥ पश्य ॥ हे मिथ्यालपितसौख्ये नवनिःश्वासैः पृथुमन्म
थोत्थदवथुः यत्नेनावेदितः अतः कांतं प्रति कोपेन कृतं किंभूतैर्निःश्वासैः हाराकेदलितैः पुनः हृदि प्रविततैः पुनः कं
ठे लुठद्भिः हठात् हक्कीतिर्यद्भिः पुनः संकटनासिकांतरलितैः पुनः अन्यूष्मभिः मिथ्याआलपितसौख्ये चातुर्यं प
या तस्याः संबोधनं पृथुर्वेकुलो मन्मथः तस्मादुत्थः उत्थितो दवथुः संतापः बकुलकामोद्भवसंतापइत्यर्थः आवे
दितो ज्ञातः अतोस्मात् कांतं प्रति कोपेन कृतं ॥ यर्थं हाराग्निभिस्समीपात् कंदलितैरंकुरितैः [illegible]नैर्नि[illegible]द्भिः
संकटासंकीर्णा या नासिका तत्र चंचलतां प्राप्तैः अनेन हास्यकारीवनर्मविदिति ॥ विदूषकलक्षणमुक्तं यत्र
न्यूष्मभिरत्युष्णैः शार्दूलवि॰ स परिकरान्नायकान्निरूप्येदानीं तथैव नायिकाः प्रदर्शयन्नाह स्वकीयेति स्वकीया पर
कीया च सामान्यवनिता तथा ॥ कलाकलापकुशलास्तिस्रस्तस्येह नायिकाः ॥ पश्य ॥ तस्य इह तिस्रो नायि
काः स्वकीया च पुनः परकीया तथा सामान्यवनिता किंविशिष्टाः कलाकलापकुशलाः तस्य पूर्वोक्तच

श्री॰
शृं॰गा॰
र॰ति॰ल॰
कं॰
१५

र्विधनायकस्य इहस्त्रंभ्यारे पत्युरादेशतत्परा स्वकीया न उज्ज्ञे रसाम्रतसिंधीकरग्रहविधिंप्राप्ताः॥पत्युरादेशतत्पराः पाति
व्रतादिविचलाः स्वकीयाः कथितास्ते इति॥अप्रकटपरपुरुषानुरागा परकीया वित्तमात्रोपाधिकसकलपुरुषाभिर
लाषा सामान्यवनिता कलाकलापकुशलाः तत्र स्वकीयायां कलाः पतिशुश्रूषणानुरंजनादिरूपाः तायवकला
पोऽस्यषांतेन कुशलास्सर्वालंकारतिरस्कारकारिणी परकीयायां कला अभिसारोचितवेषधारणशिल्पनैपुण्या
दिरूपाः तासां कलापः समूहस्तत्र कुशला प्रवीणा सामान्यवनितायां कलाः कोकोक्तमतेन तंत्रादि [illegible]तान्वर
कुशला विविधा कलापोऽस्यषांतेऽहे नृणां वेसंहतेऽपि वेति विग्रहः तत्र स्वकीयाल्पसां[illegible]वयमेवोदाहरति॥पौरावा
वारस्त्वासाधीसमार्जवविभूषिता॥मुग्धामध्याप्रगल्भेति स्वकीया त्रिविधा च सा॥४७॥साध्वी स्वकीया किंभूता।
पौरा वारस्ता पूर्वस्मिन्काले पुरा तत्र भवः॥पौरः॥सीताऽरुंधतीप्रभृतीनामाचारः॥भर्तृशुश्रूषानुरूपमाचरणं
तस्मिन्रता अनुरक्ता सा सहनता आर्जवमृजुता ताभ्यां अलंकृता सा स्वकीया त्रिधा मुग्धामध्याप्रगल्भेति
ति अथ मुग्धां नायिकां लक्षयति॥मुग्धा नववधूस्तावनवयौवनभूषिता॥नवानंगरहस्यापि लज्जाप्रा
यरतिर्यथा॥४८॥नवेन यौवनेनालंकृता अंकुरितयौवनेत्यर्थः नवो नवीनोऽनंगः कामो यस्याः सा नवव

शृं॰
१५

त्ति
धूर्नवोढा इहाति स्मृतिरिति रहः स्यानाङ्गमपि लज्जाप्रायरतिर्यस्याः एकांते धैर्यहोत्यर्थं मुग्धाज्ञातयौवनाऽज्ञातयौवना
चेति॥तत्राज्ञातयौवनामुदाहरन्नाह॥मानमिति॥मानं कर्णाभ्यर्णं प्रसरति तथाप्यक्षियुगलं कुचौ वा कुंभारंभौ तदपि चिबुको
न्नंभनरुचि॥नितंबप्राग्भारो गुरुरतं स्पृहयते कथं विज्ञो न तृप्तिस्तरुणिमनि मनो मे स्पृहयति॥४५॥अहं मनो मे स्पृहयति
तरुणिमनि कथं विज्ञो न तृप्तिः यतः अक्षियुगलं कर्णाभ्यर्णं गतं तथापि प्रसरति कुंभारंभौ तदपि चिबुकोन्नंभनरुची र
गुरुरपि नितंबप्राग्भारः गुरुत्वं स्पृहयते तेन करणस्य भावस्तरुणिमा तस्मिन्तु करणसमीये प्राप्ते कुंभवत् आरंभो ययोस्तौ
न तु कुंभग्राहृदेशौ चिबुकस्योन्नंभने रुचिर्ययोस्तौ नितंबस्य प्राग्भारः पश्चाद्भिन्नेनवः स्त्रीकटयाद्यमर॥गुरोर्भावो
गुरुत्वं॥शिखरिणीछंदः अज्ञातयौवनायथायसमंजस्यं॥नीतानीरमुपागता अवतायोः [illegible]स्फुरन्नेत्रयोः [illegible]त्रेल
ग्नमिदं किमुत्पलमिति शंगां कल्पयति॥शैवालांकुरशंकया शशिमुखी रोमावली प्रोंछति श्रीतास्मीति [illegible]कः स
खीमपि दिनश्यामा मदीयं पृच्छति इति॥अथ शंकानवोढोदाहरणं॥यथायोमं नोयामिति॥यथायोमानोयं स्तनभुविल
सत्स्वेदकणाकः पुनर्दृष्टिस्तिर्यक्पतति निसहसा संकुचति च॥तथाशंकेऽमुग्धाः॥प्राणायित्रिदशाक्वादितरसेन मथ
स्यं चेतः प्रगुणरमणीयं न च हठं॥४९॥यथास्तनभुवि त्र्यंलसत्स्वेदकरणिकोरोमांचः पुनः दृष्टिः सहसाति

श्री॰
अ॰ गा॰
का॰
१३

र्येकं यथा भवति तथा पालति च पुनः संकुर्वाति तथा यं कें अनुष्याः येनः प्रणयिनि लम अस्यं नवहृदं किंस्मं तं येनः दास्या
दितरसं पुनः प्रगुणरमणीयं मल्लन भुवि मल्लन प्रदेशो लक्षोति स्वदकणि कायस्मिन्नः रोमां चोते मोऽत्र मन्त्रयाजेनाहं यां के अ॥
मुष्याः नवोढायाः वेनेऽहृदयं प्रियतमेन मध्यास्थं स्थलम्हलसन्नेद्धाा करोमां चलताम् न च हृठं दृष्टेत्र सा स्मिकपलमा
कुंवनत्वात् दरर्ईषत् आस्वादितो रसो येन तत् दृशो भये दृशो गात्रे किंचिद्दृष्टे दोध्यय मितिशेषः प्रकृष्टगुणे रमणी
यं संदरं प्रकृष्टगुणान्वमत्वहावभावविलासाभिलाषादि रूपत्वं ॥ शिखरिणी छंदः लज्जामायरतिर्नवोढाया यावि
रमनायोति ॥ विरमनाथ विमुंच ममांचलं शामयदीपमिमं समया सखी ॥ इति नवोढवधूवचसा युवा मुदनादपि ।
कांस्वरतादपि ॥ प० ॥ युवा इति नववधूवचसा स्वरतादपि अधिकां मुदं आगात् प्राप्तीति किं हेनाथ विरम मम मांचलं
विमुंच इमें दीपशमय सखीसमया समयेऽस्यायं निकटवा चिकुत्र विलेविवितं दृन्ने रतः स्यापि लज्जामायरतिर्य
था सकंपेति ॥ सकंपा तुंबनेवक्त्रं हरत्येषावरहिता ॥ पराङ्मुखी त्विरं नत्वे आस्ते रंतुं चवां छति ॥ प० ॥ एषा सकंपा तुंबने
वक्त्रं हरति ॥ अवगूहिता आलिंगिता सती विरं पराङ्मुखी तिर्यम्भ्रतान तल्पे शय्यायां तिष्ठति ॥ एषा मुग्धा पुनः से वा
अपहरति यदा संत्तुंबने क्रियमाणे वलयति शायनीये कंपते च प्रकामं वदति च यदलः पंकि चिडक्ता पिस्म

अं॰
१३

योरसाय तिसततरंतच्छिन्नमंतनवोढा ॥ प० ॥ नवोढा छिन्नं अंतः सततरं रमयति यत् तुंबने आस्यं परिहरति क्रियमा
णा शायनीये वलयति च पुनः यत् स्म यः उक्तापि किंचिद्दलस्पष्टया स्पष्टं आपि वदति नवोढा नववधूः तस्य ना
यकस्य चित्तं हृदयं अंतः अधिकं तरां सपर्य्ये क्रीडयति यत् यस्मात् आस्यं मुखं अपहरति दूरी करोति आलिं
गिता सती शय्यायां तिर्यक् स्वपिति प्रकाममतिशयेन स्म यो वारं वारं किं चित् ईषत् अलक्षणी यमालिनी छं
दः रतौ वामा यथा दृष्टा हृष्टिमिति ॥ दृष्टा दृष्टिमधो ददाति कुरुते नालाप माला पिता शय्यायां परिवृत्य ति
ष्ठति बलादालिंगिता वेपते ॥ निर्यांतीषु सखीषु वासभवनान्निर्गंतुमेव हते जाता वामतयैव मेद्य सुतरां प्रीत्यै
नवोढा प्रिया ॥ प० ॥ नवोढा प्रिया अद्य मेवाम नयैव सुतरां प्रीत्यै जाता कथं दृष्टा सती दृष्टिं अधो ददाति आलापि
ता सती आलापं न कुरुते शय्यायां परिवृत्य तिष्ठति बलादालिंगिता सती वेपते वासभवनात् निर्यांतीषु सखीषु ।
निर्गंतुं ईहते मे मम वामतयैव वक्रतयैव प्रीतिक्षमितेंजाता वासभवनात् क्रीडागृहात् ॥ अथास्याः सांत्व
वादनप्रकारमाह मुग्धेति ॥ [illegible] मन्तनयत्नमेष स्मर हृपायेन सांत्वयत् ॥ नातिभीतिकरैर्भवैर्निबंधैर्बालभीष
केः ॥ प० ॥ एष नायको निर्बंधैः कथा रूपैर्भावैः सांत्वयन् स्मरहृपायेन ॥ अनुनयति अनुनयं करोति किं स्म॰

श्री॰
शृं॰ गा॰
ति॰ लं॰
क॰
१४

तेभीतेः मश्यन्ति भीतिकरालानि भयंकराणिः बालभयजनकं शृंगमेवाङ्गुलयमभिनयपूर्वकं दर्शयति सरलीति सर
लिसरसमस्तीरीदेषाभमद्रुमरावलीस्य मुखिविकुरिव पद्मं मन्येनवास्य प्रियासा या ॥ इति निगदिते किंचिद्ग्रीत्या विव
र्त्तितकंधरा वदनकमले भृंगैर्बाला परिचुंबितं परिचुंबिता ॥ ५४ ॥ हे सखि अहं मन्ये यथा भ्रमद्भ्रमरावली तव आस्यपि
पासया रसमस्तीरान् सरति किं स्तापमेवि मुखी इति निगदिते सति किंचिद्ग्रीत्या विवर्त्तिता नियं कृष्णा कंधरा
ग्रीवा यया सा बाला भृंगैर्वदनकमले परिचुंबिता ॥ सुष्ठु मुखं यस्याः सा तस्याः संबोधने भ्रमंती या भ्रमराणां आवलि
पंक्तिः मुखस्य पानमिच्छया तदा गत्य रुढा तेन कमले वेमुखं भजंती अथ नवोढा दर्शयन्नाह अन्यामिति अन्यामनि
वेषमाणेपि यदि कुप्यसि साम्प्रिये योऽदि तस्या गतः स्खलं भुजनीलाबकुप्यति ॥ ५५ ॥ सा प्रियेपि कुप्यति किं स्तनोर
प्रिये यदि अन्यां निरीक्षमाणे पुनरस्य नायकस्य यतो ते दिति च पुनः स्खलन्मनु नीलाबकुप्यति सा नववधूः प्रिये कुप्य
तीत्यत्र विरुद्धं यतः कृपत्रुद्धेर्ष्यालुं त्योर्थीनां ये प्रति कोपयति स्त्वेवं प्रियाय कुप्यती स्यात् तत्राह विवक्षा
तः कारकाणि भवंतीय याज्ञातं वेशो भुवनविदितत्वात्माय एतत्काव्यजनितकर्तृत्वेति सत्वेन ज्ञातं वै शाब्दिति भवति
अथवा यं प्रतिकोभावात् अस्मिन् अन्याहृष्टिं माकार्षीदित्यर्थः ॥ अन्यालापि का सुप्तस्य नायकस्य संतुष्टाभव

ॐ॰
१४

श्रीः

तिता मुदा हर्षेण ॥ मन्यामिति ॥ मन्योक्तं ते प्रथममेव विकारमन्यं नो ज्ञानती नववधूरुदतीपरे सा ॥ धूर्तेन लोचनजलं प
रिमृज्य गाढं संचुंब्याधरतलेण मिता प्रसादं ॥ ५६ ॥ सा नववधूः यामन्योक्तेः पे प्रं रुदती किंचिदूप्य अन्यं विकारं नो
जानती पुनर्धूर्त्तेन प्रसादं गमिता प्रापिता लोचनजलं परिमृज्य च पुनः अधरतलेण गाढं संचुंब्य मन्योक्तो पेपरं केव
लं विकारं मानोपलंभनादिरूपं विकारो मानसो भावरूपमदः प्रसन्नं ता प्रापिता अथ मध्या आरूढयौवनेति
आरूढयौवना मध्या प्रादुर्भूतमनोभवा ॥ प्रगल्भवचना किंचिद्विरूढभ्रमा यथा ॥ ५७ ॥ आरूढं यौवनं यस्याः
सा मध्या प्रोयता तारुण्यशालिनीत्यर्थः ॥ प्रकटीकृतः कामो यस्याः सा किंचिदीषत् प्रगल्भानि वचनानि यस्याः सा वि
राजंते विभ्रमा यस्याः ॥ सा तदुक्तं रसान्तरासिंधौ समानलज्जामदना प्रोयता रुण्यशालिनी । किंचित्प्रगल्भवचना
मोहांतसुरता समा मध्या स्यात्कोमला क्वापि मामे कुत्रापि कर्कशेति यथेति निदर्शनं आरूढयौवनां दर्शयति
नवन्नारमिति ॥ नवन्नारं वक्षः स्वयति तनुनीनाय विहसाः कुचद्वन्द्वं तं हृदयमहुद्भः कान्तु कुसौ ॥ गतिर्मंदीभूता
हसितिगमनं मन्मथयता महोत्तस्यास्तुल्यं तरुणिमनि सर्वं विजयते ॥ ५८ ॥ अहो तरुणिमनि सर्वे तुल्यं विजय
ते यत् तस्याः क्षुधः स्तनीनामपि दृष्ट्या मननशीलानां नेत्राणि प्रेरयति किंस्तनं वक्षः तरती तारा कनीनिकाय

श्री॰
अं॰ गा॰
क॰
१५

क्षिपत् तस्या हृदयं कान्त आह दोन कुरुते किं मम हृदयं कुरुते ढुंढा कान्तेन तस्या गतिर्मन्मथयनागमने हरति किंभूतानि
मंदीभूतानि कृतानि स्यभावरक्तकाणि मानस्मिन् वृत्तुलं समालं विजयते वधूजीताचेकवचने अहृदो हृदयं भूत्वा नु
तद्वस्थां दर्शयन्नेव प्रादुर्भूतमनोभवां दर्शयति॥ दृष्टिः स्निह्यति निर्भरं प्रियतमे वैदग्ध्यभाजो गिरः कामं
कुंतलपालिकाविरचने त्यक्तान्यकर्मा करः॥ बद्धः संहृप्यते पुनः पुनरिदं लीलालसं गम्यते जाताः स्वभ्रमतो समा
नवदशा कस्मादकस्मादियं ॥८०॥ हे सखि कस्यचन नवदशा अस्मात् कस्माज्जाता यतः दृष्टिर्निर्भरं यथा स्यात्तथा
प्रियतमे स्निह्यति पुनर्गिरो वैदग्ध्यभाजः पुनः कामं यथा भवति तथा कुंतलपालिकाविरचने करः किंभूतः
करः त्यक्तान्यकर्मा पुनः इद्धवसः॥ पुनः पुनः संप्रियते पुनः लीलालसं यथा स्यात्तथा गम्यते स्वभूर्वोयस्याहे स्नि
ह्यति प्रीतिं करोति गिरो वाण्यो वैदग्ध्यं भजन्ते कुंतलानां केशानां पालिकारचना विशेषः तस्या विरचने करो हस्तः
संहृप्यते ग्राह्यायोलीलया अलसं किंचित् प्रल्लववचनां दर्शयति सुभग कुरबकस्त्वं नो किमालिंगनोत्कः।
किमु मुखमदिरेच्छुः केशरो नो हृदिस्थः॥ त्वयि नियतमशोके युज्यते पादघातः॥ प्रियमिति परिहासात्पेशलं

अं॰
१५

काचिदूचे॥८१॥ काचित् प्रियं परिहासात् इति पेशलं यथाले ऊचे इतीति किं हे सुभग त्वं कुरबकः आलिंगनोत्कः किं हृदिस्थ
केशरो नो मुखमदिरेच्छुः किमु अशोके त्वयि निपतं पादघातो युज्यते प्रियं प्रति इति विषेस्यमाणं पेशलं सुंदरं उवाच वक्ता
भगाच्छंदोनोनिषेधे कुरबको वृक्षविशेषः कुंडनिलयालिंगितः॥ स तु कामिन्यालिंगनेन पुष्पितो भवतीति प्रसिद्धं आ
लिंगने उत्कः सोत्कंठः हृदि तिष्ठतीति हृदिस्थः हृद्युम्यां चेति सूत्रेण सप्रम्यलुक् केशरो नागकेशरः स तु विला
सिनी मुखमदिरापूत्कृतः पुष्पितो भवतीति अशोकोपि वृक्षः कामिनीचरणघातेन तथैव पक्षे सुभगः छि
द्रान्वेषणत्वसंबोधने हे सुभग समाच्छिद्र अशूणकपटिन्निति यावत् त्वं कुरबकः कुत्सितो रवो यस्य सः
वि दोषाहिआषेति सूत्रेण कपूत्र अशोकशोकरहिते विचारसून्ये इत्यपरार्थः घातस्ताडनं प्रतुल्यपे युक्तः विवक्षाहोः
भ्रमायया॥ कान्त इति॥ ॥ कान्तेन तथा कथमपि प्रथितं मृगाक्ष्या चातुर्यमुद्धतमनोभवया रतेषु॥ तत्कूजितं स्व
नुवदद्भिरनेकवारं शिष्यायितं गृहकपोतशतैर्यथास्यात्॥८२॥ मृगाक्ष्याः कान्ते चातुर्यं प्रथितं रतेषु कथमपि
तथा मृडुतत्कूजितं यथा अनेकवारं मृदुवदद्भिर्गृहकपोतशतैः शिष्यायितं स्याद्रिपन्वयः किंविशिष्टया
मृगाक्ष्या उद्धतमनोभवया मृगवत् हरिणवत् असिणी यस्याः सा तया कान्ते वल्लभे चातुर्यं स्वचतुरत्वं

श्री·
शृं· मा·
र·
१६

प्रथितं विस्तारयत्सु रतेषु सुरतेषु कोमलं धुनितं शिथिलवदाचरितं उद्धतं उद्धतः कामो यस्याः सा तथा तदुक्तं पञ्चसायके पिकपिशिखिकलहंसप्रायपक्षिप्रजानां स्वनितानि तन्मतं करोति । युगनामस्य यात्रामनुरुदशनविवर्जितानखकचोद्गावदेतिस्तनितमिति समासाक्षिप्तं संभोगकाले॥ यथा [illegible]कसर्वस्वदानमूहलानकमासुरकपोतहंसपारावतादिरूपवत् ध्वानितं रतारवं तन्मिश्रितिः श्वसितमणितकृतहाहावनादैः संयोजयेन्मदनमैथुनवृन्दवनादवितथादि तस्या एव प्रौढायाः र रतप्रीतिरानन्दात्संमोहश्चेति कर्मद्वयं तद्दर्शयति पद्यद्वयेन॥ वाढं व्याप्रियते कान्तं पिबतीव रतावियं विशतीव तदङ्गेषु मुह्यतीव स्रवे यथा॥६३॥ इयं प्रौढा रतौ क्रीडायां कान्तं पिबतीव तस्य नायकस्याङ्गेषु विशतीव सुरते सुरतानन्दे मुह्यति वपिबतीवेत्यत्र पानं सादरावलोकनमेव हठालिङ्गनमेव प्रवेशः॥ सुरतानन्दजनितसुखाधिक्यमेव मोहः यथेति निदर्शनं कृतानेकविधारसेन सुरते केलिं कथं विद्रुमाग्रापानः॥ सुखमीलिताक्षियुगला स्विन्नकपोलस्थली॥ सुप्तेयं किल सुन्दरी निभृतभृगः स्वैरं तथैवास्वजत्क्रीडानङ्गविमर्दनैः सहतनुर्निद्रां सहैवागतः॥६४॥ सुभगः सादरः स्वैरं स्वच्छन्दं रतिहेतोः आस्वजत् यथा सहैव निद्रामागतः इतीति किं॥ इयं सुन्दरी सुरते रसेन अनेकविधां केलिं कृत्वा किल सुप्ता किंभूता सुन्दरी कथं विद्रुमाग्रापानः सुखमीलिताक्षियुगला पुनः स्विन्नकपोलस्थली किंभ्र

जें:
१६

तः सुभगः॥ गाढालिङ्गनविमर्दनैः॥ सहतनुः आस्वजत् आलिङ्गितः सहैव आलिङ्गनेन अनेकविधां वक्रप्रकारां किल वार्त्तां वार्त्तासंभाष्ययोः किल तमरः आघ्राय अनु सुखेन तेन मीलिते अक्षियुगले यथा सानन्दं सङ्गमरसानन्दमुकुला दृष्टिश्चोक्ता संगीतरत्नाकरे स्फुरत्सौष्ठवपक्ष्माया मुखविश्रान्ततारका मुकुला दृष्टिरानन्दे हृदयोः स्पर्शाङ्गयोरिति गाढो हठो तेरतः कामस्तस्य विमर्दनं तेन निःसहानिः सत्तानत्वपस्याः॥ तायस्य सबाह्येन हृदयोः सानन्दावाक्षियुगपदेवल्लविता तदुक्तं रतिरहस्ये सुखेनामीलनं वाश्रेणोश्रुतिकालस्य लक्षणं सर्वमेतत्परिज्ञाय साधयेन्नास्त्वयं तेन इति अथ मध्येयं मानावस्थायां त्रिधा॥ तदुक्तं रसामृते सिं धीत्रिधासौ मानवृत्तेः स्याद्धीराधीराभयात्मिकेति उक्तं च रसमञ्जर्यां मध्याप्रगल्भे मानावस्थायां प्रत्येकं त्रिविधेति तदेव दर्शयन्नाह सा धीरेति॥ सा धीरवक्रिवक्तोक्त्या प्रियं कोपात् कृतागसं॥ मध्याधीरादि तु पालं भेरधीरा परुषं यथा॥६५॥ सा मध्याधीरा या कृतागसं प्रियं वक्रोक्त्या वदति या कोपात्॥ प्रियं प्रति परुषं यथा स्यात्तथा किः सा अधीरया प्रियं प्रति उपालम्भैः सहरोदिति साधीराधीरेति योज्यं यथेति निदर्शनं कृतो वराधो येन स तं परुषं कठोरं उपालम्भरूपैर्वाक्यैः॥ अनयोस्तु विशेषः मध्याधीराया: कोपस्य मीयं विजिकाश्च धीराया: परुषवाक् धीराधीरायाश्च वचनरुदिते कोपस्य प्रकाशके उक्तं हि रसा

श्री॰
शृं॰गा॰
ति॰ क॰
ल॰
१२

लीवेपीतनुवङ्किपङ्क्तौ व्यासोप्यासंकुमनाकुस्मितमितमपभवः नमध्याधीतयथाउपेत्येति उपेत्यतांहठपरिरंभलाल
संस्थिगादभ्रूः प्रमुषितवाक्वदनः॥ धूर्त्तोऽजनः सपदितदस्मितुंवनादिहैवने प्रियविदितोकनाथेना॥८७॥ हेप्रियने
धूर्तार्थनासपदिदेहैवविदिदिनातंतांउपेत्यहठपरिरंभलालसः चिरातव्यूभ्रूः किंभूतः प्रमुषितवाक्वदनःपु
मःकिंनदासितुंवनाथ्दतोऽजनः तेनवक्षनकृत्पनातस्कालं॥ अत्रैवज्ञातानायिका प्राप्यहठपरिरंभोआलिंगनेन्द
स्नायस्पसः उभावरसि [illegible] सेनयनगालकपोलदंतवासोमुखांतस्तनजघनललाटकंकुंवनस्थानमाकुः वि
ताचिरकालंप्रमुषितंचोरितंवाकसंदरंदंतेयेनसः तस्यातिशोषः तस्याभ्रश्णोर्नेत्रयोश्चुंबनातधूर्तांजनेय
नसः अधरयोरितिशेषः॥ अथमध्याऽधीरायथा॥ यन्नाकीपितमिति॥ यन्नाकीपितमिंडनास्सरसिजेटंगारपुं
जायितंभुल्हायांमयिताघ्यतेकदलिकाकांडेरर्लतायितं॥ कालोन्पःखलुकोपिसोद्धतमयोजातोविषात्माधुः
नाधिकुलाधत्तेविनिर्यदश्रुरवलामोरंरुदंतीगता॥८८॥ हेनाथयत्रमपिंडनाग्राकोपितं पुनः॥ सरसिजेरंगारपुं
जायितंपुनः कदलिकांडेःहेभ्रंतेताधिकुञ्जवलारुदंतीमोहंगतानाकिंभूतानिर्यदश्रुः नायस्तामिनुयत्रयस्मि
नुकालेयुकेवचपूर्यवदाविरिंताकमलेरंगारपुंजवदाचरितं अलानतनंआचरितंप्रईज्वलनुकास्तमनातपु

ई ई
ॐ॰ १२

यानेनभ्रंकुह्यायांसमुसिडुःखलुवाघ्यलंकारेकोपिअद्भुतः अद्भुतस्वरूपः तद्योमयदूषितानाधिषस्वरूपः आतः
प्राप्तः अथवंतेपनेतानन्निवलाभावोद्योततेविशेषणानिचेतिनिर्गच्छंतिअश्रूणियस्यांसा॥ अथधीरामध्यमध्या
यथासांद्रंमनोरथ्यपातेत्तवधूर्तफातासेयहिथितामनसिकृत्रिमभावरम्या॥ अस्माकंमभितनकर्थविदिदावका
शास्तस्माकृतेवरपाणातविडंबनाभिंस्थिता॥ अत्रतामेवयाहीतिवाक्यसमाप्तिः किंभूतानाकृत्रिमभावरम्याइ
हनचअस्माकंकश्चिन्मनअवकाशोस्तितस्मात्वरणापानविडंबनाभिः कृतेव्यर्थेइहमनसिअवकाशः प्रकाशःअ
स्याएवोदाहरणामुज्ज्वलमणौयथागोपेंद्रतंदनवरोदययाहियाहिसातेविधास्यानिकंचकृदयापिदेवीतल्लो
लिमाल्यमुत्तवयावकपंयमस्याः पादद्वयंपुनरनेनविभूषणायेति॥ सर्वथसरसोत्कषोमआयामेवइहपत्ते यद
संवर्तनेव्याकोमोग्ध्यप्रागल्भयोर्युतिः इत्यत्रेवकिंविपीरादिभेदः॥ स्वीयायाएवनपरकीयायाइतिप्राचीनलेः
खनमाहामात्रधीरत्वंमधीरत्वंतउभयंवामानानियतं परकीयायामानश्चेन्नैवमानस्यफलात् मानश्चेनपरकीया
याइतिवक्तुमशक्यत्वादितिरसमंजरीकारोक्तेः अथप्रगल्भालज्जायतिरिति॥ लज्जायतिः प्रगल्भा स्यात्स
मस्तरतकोविदा॥ आक्रांतनायकावाढंविराजद्विभ्रमायथा॥८९॥ लज्जायतिः लज्जामात्राऊनरकालेना

श्री॰
शृं॰ गा॰
र॰ ल॰
क॰
२८

वितवयः कौशलेय थामामापत्तेरतेषु स्वरतेषु प्रवीणा आक्रोतोऽलककतिलकविरचनविपटीतनस्वस्तनस्तवंदादि
मिलीपकोयुयानडनं संगीनरसस्य धनुर्वल्लीसमंकातेकृत्वा दृष्टुनिजाधराविपरीतवेनधन्नेरागादाक्रोननायकाद्
तिथादमन्मथविरजंतोविभ्रमायस्याः सा संगीनदामोदरे प्रगल्भासमधा स्मरंधाराद भारुगपासमन्तरनकोविदा
भावोक्तनादशक्रीडाप्रचंडाआक्रोननायकोनितथल्लव्याप्तनि प्रगल्भाययासेषमिति सोऽयं पंकजिनी मृणाललतिका
मादायथैस्याः प्रियो हारं मे कुरुते पयोधरतटे प्रत्यग्रतारारुचं॥ यं धूकंचनदेनदालिविदलयत्नेन सीमंतितं॥ सर्वथा
विजिगीषुपुष्पधन्वनो वाणश्रियं धास्यति॥ २४॥ हे आलि सोऽयं पंकजिनीप्रियो वल्लभः यस्याः मृणाललतिकां
आदाय मे पयोधरतटे हारं कुरुते किंभूतं हारं प्रत्यग्रतारारुचं च पुनः एतत विदलनं बंधूकेन यत्नेन सीमंतितं
सत सर्वथा विजिगीषुम पुष्पधन्वनः वाणश्रियं धास्यतीत्यन्वयः हे सखि सा प्रसिद्धा पद्मिनी प्रियो यस्याः पद्मिन्याः
मृणालस्य विशस्य लतिकां लतेवतो यद्वा मृणाललरूपायालतिकां आदाय कस्याविय आदायेति दोषः एवंबंधूके
नापस्य थानोऽपि मे मम पयोधरतटे स्तनतटे कुरुते स्त्वयतीत्यर्थः प्रत्याग्रानवीनायाताराभोपिनिः स्तनास्त्यं यंः
थालायान सवाणितंदडकुंकुमांनिर्यस्यसमंविदलनस्फुरनवंधूकंकुपुष्पं विशेषः यतनव धूकंतेन प्रायेणासी।

ओं॰
२८

मंतितं सीनीकृतं सीमंतनयत्र शार्कधादिषु पञ्चपवाच्यं सोमंतितंहल्यवनारफ्कादिस्य दत्तबुसर्वथाप्ताना प्रायशादिशास्त्रे
तिनाविशेषेणाजेतुमिच्छुः विजिगीषुः सयाऽसौ पुष्पधन्वेति समसर्वथासौ विजीगीषुपुष्पधन्वा कामस्तस्यवाणश्रियं
शोभां धरिष्यति। अथ समलतनकोविदाप्रगल्भोदाहरणं॥ यत्र स्वेदलवैरलं विलुलितं बालुप्यते चंदनं स्वच्छं
दैर्मणितैश्च यत्र रणितं नेकूयते नूपुरं॥ यत्रौनपि चिरेण सर्वविषया कामेनदेकाग्रता सत्यस्तत्सुरतं भणामि तत
येषाघोनुलोकस्थितिः॥ २५॥ हे सखि सः सुरतं रतये भणामि शेषानुलोकस्थितिः यत्र सुरत विलुलितैः स्व
दलवैः चंदनं बाल्यते यत्र च स्वच्छंदैः मणितैः रणितं नूपुरं निकूयते यत्र कामेन यथा स्यात्तथा सर्वविषयस्य
चिरेणातदेकाग्रतां आयातीत्यन्वयः सुरतं क्रीडां रतये रत्याय भणामि कथयामि यत्र यस्मिन् सुरते विलुलितैः
श्वंवलैः स्वेदलवैः प्रस्वेदविंदुकाभिः लवलेशकणाणवस्त्वमरः मणितैः रतिकूजितैः मणितं रतिकूजितं मित्यमरः
रणितं शब्दायमानं नूपुरं मंजीरं निकूयते आश्रुयते कुञ्ज अपनयने सुरतस्य एकरूपतां॥ अथाक्रान्तनाय
काप्रगल्भा यथा॥ स्वामिन्निति॥ स्वामिन भंगुरयालकं सतिलकं भाले विलासिन् कुरु प्राणेश त्रुटितं पयोध
रतटे हारं पुनर्योजय॥ इत्युक्तो सुरतावसाने सुखिता संपूर्णचंद्राननास्पृष्टा तेन तथेति जातपुलका प्रा।

श्री·
शृं· गा·
फ·
टी·
१५

माधुनर्मोहनं ॥ ७५ ॥ हे स्वामिन् अलकं भंगुरय हे विलासिन् भाले स्वतिलकं कुरु हे प्राणयेश त्रुटितं हारं पुनर्योजय स्तु
नांसं स्पृष्टा वेडालनना पुनर्मोहनं प्राप्ता किंभूता स्वरतावसानसुरतिना पुनः ॥ तेन तस्याः इति स्पृष्ट्वा पुनः जातपुलके स्व
वपुः स्वामिनैव स्वयं अलकं भूगीकृतं तलं भंगुरय कुटिलय स्वयं येतिष्ठा भाले ललाटे स्वकृतं तिलकं प्राणेशः जीवेशयो
जय संयोजय संधवंद्धवदनाद्यवेन स्तुघदाभावो धन्यते मोहनं मोहं स्वरतस्यां तेस्वलसंज्ञा नमस्याः तेन विलासि
नालेन प्रकारेण प्रकारवचने याल्लु अथ विराजन्ति भ्रमा प्रगल्भोदाहरणं ॥ मधुरवचनैरिति ॥ मधुरवचनैः सभ्रू
भंगैः कृतांगुलितर्जनै रभसवलितैरंगन्यासैर्महोत्सवबंधुभिः ॥ असकृदसकृत्स्फारस्फारैरपांगविलोकितैस्त्रि
भुवनजये सा पंचेषोः करोति सहायतां ॥ सा पंचेषोस्त्रिभुवनविजये सहायतां करोति कैः सभ्रूभंगैः म
धुरवचनैः पुनः कैः कृतांगुलितर्जनैः सहअंगन्यासैः किंभूतैः अंगन्यासैर्वलितैः पुनः अलसवलितैः पुनः
कैः असकृदसकृत् अपांगविलोकनैः किंभूतैः अपांगविलोकितैः स्फारस्फारैः किंभूतैः रतैः मनोभ
वबंधुभिः सनाथिका पंचशरषयो बाणा यस्य पंचेषुः कामः उन्मादनो मोहनस्तथा प्रहरणं विडः शोषणं मा
रणं चैव पंच बाणा मनोभुव इति भ्रूभंगैः सह वर्त्तमानानां सभ्रूभंगास्तैः कृतनायाति अंगुलितर्जनानि तैः त

उं: १५

र्जनं भृत्सना अंगुलिकारणं अंगन्यासः करचरणभुजोद्धवनस्य तादीनां न्यासैर्विन्यासैः अलसः अंगमोटनादिचेष्ट
विशेषः तेन वलितैः संभक्तैः असकृत् वारं वारं पुनःपुनः अलसवलितैरपांगविलोकितैरिति योज्यं तत्र अलसमा
लस्यं तेन वलितैः संयुक्तैः प्रेमातिशयात्तिर्यग्विलोकनं ॥ अपांगो नेत्रयोरन्तः तत्पूर्वं विलोकितैः स्फारस्फारैः
दीर्घतरैरित्यर्थः मनोभुवः कामस्य पंचबंधुभिः सहायकर्तृभिः ॥ अथ रतानुकूल प्रगल्भोदाहरणमाह ॥ निराकु
लारतावेषाद्द्रवंतीव प्रियांगके कोपकास्मि रतं किं वा न वलितवरसनया ॥ ७७ ॥ एषा रतौ प्रियांगके द्रवतीव नि
राकुलावपुनः कोपं कास्मि किं वा रतं रसान्न वेत्ति एषा प्रगल्भा रतौ क्रीडायां प्रियस्य अंगमेव अंगकं तस्मि
न् स्वनीद्रवाहारः द्रवन्तीव नितरां लीनेवेति इवशब्दोपादानात् उत्प्रेक्षणायमलंकारः तदुक्तं दंडिना ॥ मन्ये शं
के ध्रुवं प्रायो नूनमित्येवमादिभिः उत्प्रेक्षा व्यज्यते शब्दैरिवशब्दोपि तादृशः इति नितरां आकुला निराकुला रसा
त् इति रसवशात् यथाहमरुकः ॥ कांते तल्पमुपागते विगलिता नीवी स्वयं बंधनात् वासो विश्लथमेखलागुणधृ
तं किंचिन्नितंबे स्थितं ॥ एतावत्सखि वेद्मि केवलमहं तस्यांगसंगे पुनः कोसौ कास्मि रतं च कीदृगिति मिति स्व
ल्पापि नैव स्मृतिरिति रतेः ॥ पूर्वावस्थे यंत्र विनाभ्रुद्युमंगम् स्फुरद्भसो विकसन्मुखपंकजे निमीलन्नयनं ली

श्री॰
र॰ मा॰
र॰ टी॰
क॰
९

विनाभिशैथिल्यमेवचेति ॥ मध्यामाहमेवोदाहरति ॥ धन्यास्ता इति ॥ धन्यास्ताः सखि योषितः प्रियतमे सर्वांगलग्नेपि याः
प्रागल्भ्यं प्रथयंति मोहनविधावालंब्य धैर्यं महत् ॥ अस्माकं तु तदीयपाणिकमले पुन्मोचयत्यंशुकं कोयं कावय
मथ किं नु सुरतं स्वल्पापि नेव स्मृतिः ॥२८॥ हे सखि ताः योषितः धन्याः या मोहनविधौ सर्वांगलग्नेपि प्रियत
मे महत् धैर्यमालंब्य प्रागल्भ्यं प्रथयंति ॥ अस्माकं तु तदीयपाणिकमले अंशुकमपि उन्मोचयति सति कोयं का
वयं किं नु सुरतं स्वल्पापि स्मृतिर्नैव जायते धन्याः कृतार्थाः याः योषितः मोहनविधौ सर्वांगे प्रगल्भतां वि
स्तारयंति नस्माइदं तदीयपाणिकमले तस्मिन्नंशुकमिति पनेलनीवीग्रंथि धृत्यते मानच्छलैः प्रगल्भापि त्रिधा र
धीरादिभेदतः इमां तु विशेषः ॥ प्रगल्भायास्तु धीरायाः रतौदास्यं अधीरायास्तु तर्जनताडनादि धीराधीरायाः तो र
दास्यं तर्जनताडनादिकं कोपस्य प्रकाशकेन वेव दर्शयति तत्र धीराप्रगल्भा कृतदोषेपीति कृतदोषेपि स
धीरतस्मिन्नाद्रियते रुषा ॥ आकारसंवृतिं चापि क्षौ तौदास्ते रतो यथा ॥२९॥ सा कृतागसीसरते धीरा या तस्मि
न्कृतदोषे रुषा आद्रियते न च पुनः रतोपि आकारसंवृतिं कृत्वा उदास्ते रुषा कोपेन आद्रियते आदरं करो
ति ॥ आकारसंवृतिं कृत्वा रतौ च उदास्ते आकारस्य आकृतेः संगोपनं उदास्ते उदासीना तिष्ठति यथा तस्मि

श्रीः
९

न्नाद्रियते रुषैतनामेव धीरप्रगल्भां दर्शयन्नेव तस्या उत्तममानमपि दर्शयति ॥ यद्वाद इति ॥ यद्वा वः प्रत्युरोप
चारस्य तन्वत यत्नादरं दूरतः ॥ प्रत्युत्थानमिदं स्वहस्तनिहितं यच्छिन्नमप्यासनं ॥ यत्पश्यामि यदेवमेव च मुकुटेहिं स्मवी
समुत्कीर्तनं केनवपंकजाक्षि बलवान् कोप्यप्रसादो मयि ॥३०॥ हे पंकजाक्षि तानमयि कोपि बलवान् अप्र
सादः तत्र शंके यत् प्रत्युरोपचारस्य तन्वतावः यत्नादरः सादरं प्रत्युत्थानं यत् भिन्नमपि इदं आसनं स्वहस्तनि
हितं च पुनः यत्वएवमेव मुकुटः स्मार्वीसं मुखवीहिहिं पश्यामि अप्रसाद अप्रसन्नता कोपस्य चिः तत्र तस्मात् प्रत्यु
र अधिकोप उपचार उपचरणं तस्मिन्वचराः पटवः स्वहस्तेन निहितं अर्पितं एवमेव कथयावास्यानासना
दिवात्तानि ॥ मुकुटीरंवाड ॥ अथ रतावपि उदास्ते इति च धीरप्रगल्भां दर्शयन्नेवास्याधमामानं दर्शयति ॥ यन्या
मितं निवारितो निवसनग्रंथि समुद्ग्रथयन् भ्रूभेदो न कृतो मनागपि मुखं येन त्वंडामाने परैः यच्चित्तः शंकमि
वाथितं च पुरः हेप्रभुः समालिंगने मानिन्या कथितोउ कूलविधिमानैनैव मन्युर्महान् ॥३१॥ मानिमा ऽ तेनैव
अनुकूलविधिना महान् मन्युः कथितः यत् निवसनग्रंथिं समुद्ग्रथयन् पाणिर्निवारितो न यत् मुखं खंडि
मानैः अपरैः मनागपि भ्रूभेदो न कृतः यत् रहः एकांते प्रभुर्भर्तुः समालिंगने निःशंकमिव यथ तथा अर्पितं मनुः ।

कोपः यत यतः नियसनेनीवीतस्य ग्रंथिं समुत्तुंगयत मोक्षयन्नलिवेतितोन निषिद्धोन मनागपि ईषदपि भ्रुवोर्भेदो
भ्रूभेदः मनुसंभविताकरेसम्प्रयाप्रयचिंतः नययासहजापतितास्मिस्पृष्टा विनाकिंचिंतितमस्यान्तःकुटीचनुयावे
मिप्रोक्ता भ्रूः समप्रथायुयैः स्वाभाविकी स्यान्सहजा भावेभ्रूकुटीलेश्वसोपतितस्यादधोजातासहितीयाथ
वाक्रमात् ग्रासे येविस्मयेहर्षेषे शेस्मयाद्युत्पयोः हासेग्रासोचपातेतौ विधीयेनाकुभेश्च वोधियादि अन्यासा
मपिलक्षणानि ननयधुस्रानव्यानीति रहएव कोतेरतो यारहोगृह्यैरन्यावयीति कोपः ॥ अथ मध्याऽधीरप्र
गल्भयोर्लक्षणं ॥ मध्येति ॥ मध्यापति मन्नायेनेसोल्लुंठ साधुभाषिते ॥ अधीरापरुषैर्वेदिति संतर्ज्येदयितंयथा॰
मध्याएते सोल्लुंठ पयास्यान्नथामासाधु भाषितेभंगाति अधीरादयितं रुषैः संतर्ज्यैहंति ॥ मध्यामुग्ध्याप्रगल्भाप
नेदयितं सोल्लुंठ सोपहासैः साधुवचनैः मनोहरवचनैः परुषैर्निष्ठुरवचनैर्भंगाति कथयति कथेति निदर्शय
ति नत्र मध्याप्रगल्भा कृतमिति ॥ कृतं मिथ्यावादैर्विरम विदितं कामुक विरात्प्रियांतामेवोपेत्रैरभिरसपदीपेन
खपदैः विलासैर्यथा आम्रनवहृदि पदं रागवकुलैर्मयाकिंते कृतं प्रकवमकुटीलावारपरया ॥ ८४ ॥ हे कान्
तविरात् हृदि तं विरम मिथ्यावादैः कृतं नामैव प्रियां उपेत्रैरभिसरपान नवहृदि पदौपैर्विलासैर्मयापदैः पदप्राप्ते

किं स्तेरागवकुलैः तेमया किं कृतं किं स्तनया मयाधृतं भ्रूकुटिलाचार परया कामुकत्वं पटविराच्चिरकाल्लतः वि
दितं ज्ञातं विरम स्वछंदं क्रीडयेत्यर्थः कृतं यार्थैः उत्त्रैः स्पष्टं अभिसरगाछयतु यतः यस्मादिमानि पदीयानि नेर्वैर
लासैः क्रीडारूपैः रागो विषये ज्ञानत्रवकुलैः अधिकैः तेतव किं कृतं कार्यं निश्चितेभ्रूकुटिलः ष्वासालाप आ
चार आचरणं तत्पर [illegible] याद्वारलोकवाण्येत्यर्थः आचारः सद्भिरपायस्यान्मंगलव्यवहारयोरितिव्योमदीपि
का अथाधीराप्रगल्भायाद्यमिति ॥ सावाढं भवतैभितेतिनिविडं संयम्य बाहुः स्वनात्नूपुरस्पासितां
शाठेतिपुरुषं निर्भत्स्य संतर्ज्य च ॥ आलीनां पुर एव निकृतिपरः कोपात्कृपाणूपुरैर्मानिन्याचरणप्रहारविधिर
नाप्रेयानशोचीकृतः ॥ ८५ ॥ मानिन्याकोपान्सखीनामग्रत एव रणान्नूपुरं यथास्यात्तथाच्चरणप्रहारविधिना
नाप्रेयान् अशोकीकृतः किं कृत्वा भवता वाढं साईर्षितास्मि निस्वजा निविडं यथास्यात्तथा बाहु संयम्य
शठ स्वयः तां दृष्यसि इति परुषं निर्भत्स्य च पुनः संतर्ज्य किं मन्तः निकृतिपरः न अशोक मशोकं करोति
त्यशोकीकृतः अशोकत्वं शोभिउन्नमनायिकायापादेन स्पृष्टो विकचो भवतीति व्याख्याः सोढं प्रत्यर्थं सा
नायिकाईर्षिता अवलोकिता स्पृष्टा स्वजामालया निविडं दृढं भुजयोः संजम्य वध्या शाठ प्रतेस्मयः पु

श्री॰
शृं॰ गा॰
टी॰ क॰
२२

श्लो॰ ६

नरपितो नायिकां पुरुषे कठोरं संतर्ज्य तर्जनं कृत्वा तर्जनं प्रहारः निकृतिपरः स्वापराधगोपनपरः ॥ एकाकारमता
मुग्धा पुनर्भूश्च यतो नयोः अतिसूक्ष्मतया भेदः कविभिर्न प्रदर्शितः ॥ ४४ ॥ यतः मुग्धा च पुनर्भूः एकाकारम
ता अनयोर्भेदः कविभिः अतिसूक्ष्मतया न प्रदर्शितः एक एव कथ्याकारः आकृतिर्ययोः अधीरधीरप्रग
ल्भाया उदाहरणं तु व्याख्यातमेव नावश्यं ॥ यथा रसामृतसिंधौ कृतागसि हरौ पुरस्तु चकितभ्रमद्भ्रूलता तिमाडयिर
मुकुंदमाकृति तदा द्विकृष्णोत्पले ॥ न तेन न तमताडयत् किमपि याहि याहीति साश्रु वत्स जनिमंगला सखिपरंपरा
वृन्मुरलीति यथा वा रसमंजर्यां तल्पोपांतमुपेयुषि प्रियतमे वक्रीकृतग्रीवया काकुव्याकुलवाचि विहसितं स्म
र्जैकपोलश्रिया हस्तन्यस्तकरेपुनर्मृगदृशा लाक्षारसक्षालितं प्रोष्ठी पृष्ठमयूखमांसलरुचो विस्फारितादृश
यहति एतेन च धीरादि षड्भेदा द्विधा ज्येष्ठा कनिष्ठा चेत्येतदाह ॥ मध्या पुनः प्रगल्भा च द्विविधा परिभिद्यते ए
का ज्येष्ठा कनिष्ठा स्यान्नायिका प्रणयं प्रति ॥ ४५ ॥ मध्यमा नायिका पुनः प्रगल्भा प्रणयं प्रति द्विविधा परिभि
द्यते एका ज्येष्ठा स्यात् कनिष्ठा च प्रणयं स्नेहं धीरा ज्येष्ठा कनिष्ठा च अधीरा ज्येष्ठा कनिष्ठा च धीराधीरा
ज्येष्ठा स्यात् कनिष्ठा च भर्तुरधिकस्नेहा ज्येष्ठा भर्तुर्न्यूनस्नेहा कनिष्ठा किंच उपरोधात् ॥ उपरोधानयास्ने

ऊँ॰
२२

अनुरा१

हानुरागतोपि नायकः वेष्टने ताः प्रति प्रायः कलासु कुशलो यथा ॥ ४६ ॥ अनुरागतोपि नायकः उपरोधान्न
त्यासेहान्नायः ताः प्रति वेष्टने किंभूतः कलासु कुशलः अनुरागेण सह वर्त्तत इति सानुरागोपि उपरोधान्
हठात् प्रायो बहुलेन ताः प्रति ज्येष्ठा कनिष्ठा नायिकाः ॥ कनिष्ठोदाहरणं यथाय यत्रैव शामाह ॥ तदक्षिणी
कुवलयद्युतिर्व्वस्य लीलया ध्यायहं तदक्षिणी निमील्य लोचने ॥ ततो भृशं पुलकितगंडमालां युवापरांनि
भृशं तमचुंबदंगनां ॥ ४७ ॥ युवा अपरां अंगनां निभृतं यथा स्यात्तथा अचुंबत् किंभूतां ततो भृशं पुलकि
तगंडमालां किं कृत्वा इति लोचने निमील्य इतिति किं तदक्षिणी प्रति अलिर्भ्रमर एति आगच्छतितम्भ
हरत्वाभि किंभूतो अलिः कुवलयद्युतिः अपरां ज्येष्ठां ततः चुंबनात भृशं अतिशयं पुलकितगंडमाले
ति यस्याः सा इत्युक्ता अर्थ्यस्य शामयत्याः कनिष्ठा यानि मील्य स्वहस्ते नाच्छाद्येत्यर्थः ॥ तदक्षिणी कुवल
नीलकमलं तस्मिव द्युतिर्यस्य सः ॥ अथ स्वकीयामाह संपन्नेचेति ॥ संपन्ने च विपन्ने च समरागापि नमुंच
तियास्वीयानाप्रति प्रेमजायते पुण्यकारिणः ॥ ४८ ॥ अन्यदीया द्विधा प्रोक्ता कन्योढा चेतितोप्रि

श्री॰
शृंगा॰
टी॰
४३

ये दर्शनाच्छ्रवणाद्वापि कामार्त्ते भवतो यथेति ॥ ८८ ॥ अन्यादीया द्विधा प्रोक्ता कन्योढा चेति ते प्रिये दर्शनात्
या प्रियश्रवणाच्च कामार्त्ते भवतः अन्यस्येयं अन्यदीये परकीयेत्यर्थः ॥ रागेणैवार्पितात्मानो लोकयुग्मा
